# 24

# *श्रुतिसम्प्रदाये लेखविधिः*

**श्रीकिशोर मिश्रः**

परमेश्वरप्रणीतस्य जगतः प्रादुर्भावादेव सनातनी भारतीयार्षपरम्परा संसारस्थितिविधौ धर्मार्थकाममोक्षपुरुषार्थानुपदिशन्ती जीवजातस्योपकृत्यै लयान्तां काञ्चन सर्गसञ्चालनपद्धतिं प्रसाधयति। सेयं शाश्वती पद्धतिरार्षशास्त्रेषु श्रुतिस्मृत्यादिषु प्रतिष्ठिता। भगवती श्रुतिर्हि गुरुमुखोच्चारणानूच्चारणक्रमेण सम्प्रदायविधया स्वरवर्णमात्रादिविपर्ययलेशराहित्येनानादिकालात् प्रवृत्तेदञ्जालमपि तथैव स्थानकरणप्रयत्नादिभिरविकृतोच्चार्यत इति महदाश्चर्यास्पदं भवति विश्वमनीषिणाम्। यतो हि विश्वस्य बह्व्यो भाषा अविज्ञाता विप्लुता विस्मृता विपरिणता विकृताश्चेति तैरनुभूयतेऽवलोक्यते च साम्प्रतमपि। तादृशेन करालकालप्रभावेणासंस्पृष्टेयं संस्कृतभाषेत्यस्या अमरभारतीत्वं सुतरां सिद्ध्यति।

परमत्र गुणसन्निपातेऽपि केचनावगुणान्वेषकाः संशेरते यदियं परम्परा श्रुतिप्राप्ता प्रथितेति लेखनविहीनासीत् पुराकाले। पश्चाच्च पाश्चात्त्यादिप्रभावेणात्र ग्रन्थलेखनादिविधिर्व्यवस्थित इति। परमनवगतपारम्पर्याणा तथ्यातिरिक्तानुसन्धानपराणां वराकाणामियमन्यथाख्यातिरेव। यतो हि द्रष्टुरुपदेशः श्रुतिः श्रोतुरुपदेशः स्मृतिरिति राद्धान्तः परम्परासिद्धः। अतश्च ऋषयो मन्त्रद्रष्टारोऽभिधीयन्ते, यथा निरुच्यते यास्केन-ऋषिर्दर्शनादिति। अनेनैव पथा वेदानां स्वतः प्रामाण्यं प्रत्यक्षप्रमाणत्त्वञ्च प्रसाध्यते, यथा वेदान्तसूत्रेषु-प्रत्यक्षं श्रुतिः प्रमाणं प्रत्यनपेक्षत्वादित्यादिना। अत्र चक्षुरिन्द्रियग्राह्यमतीन्द्रियं वा दर्शनं रूपमपेक्षत इति नातितिरोहितम्। तेन च लेखविधिः स्फुटमापद्यते। मन्त्रवर्णेऽप्यस्य प्रामाण्यं प्राप्यते, यथा—*उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्* इति। अत्र वाचो दर्शनं स्पष्टमुपदिष्टं तच्च लिपिसंकेताविज्ञेन कर्तुं न पार्यत इत्यपि संकेतः। श्रुतावस्यामध्ययनाध्यापनक्रमे लेखनश्रवणयोरुभयविधा पद्धतिरुपदिश्यत इत्यस्ति विशेषः। किञ्च *'प्रास्मै गायत्रमर्चत'* (ऋ. 8.1.8.) इत्यादिस्थलेष्वपि 'अस्मै इन्द्राय गायत्रं लेखं प्रार्चत प्रकर्षेणार्पयत' एवंविधोऽर्थ उपपद्यते मन्त्रच्छन्दोलेखविधिप्रत्यायकः।

वाजसनेयकेऽपि *क्षुरोभ्रजश्छन्दः* (मा.सं. 15/4) इत्येवं लेखनविधानम्, *अक्षरपंक्तिश्छन्दः, पदपंक्तिश्छन्दः विष्टारपंक्तिश्छन्दः* (मा.सं. 15/4) इत्यादिना च वर्ण-पद-संहितादिविस्तरेण लेखसंकेत उपदिश्यते। छन्दःपदेन कृत्स्नं वाङ्मयमुच्यते, नाच्छन्दसि वागुच्चरतीतिश्रुतिसमन्वयात्। वस्तुतोऽत्र लिखनविधिद्वयमुपदिशति भगवती श्रुतिः-क्षुरश्छन्दः भ्रजश्छन्द इति च (मा.सं. 15/4,5)। क्षुरादिना लौहादिलेखिन्या शिलादौ निखननकर्तनादिद्वारा वाङ्मयांकनं क्षुरश्छन्दः। भ्राजमानमस्यादिना पत्रादौ लेपनद्वारा वाङ्मयप्रकाशनं भ्रजश्छन्दः। तदुभयमपि सनातनपरम्पराप्रथितं बहुकालानन्तरं भारतातिरिक्त-देशान्तरेषु प्रसृतिंगतमित्यवगम्यते। यतो हि वर्णप्रकाशने लेखः लिपिश्चेति द्वावपि शब्दौ सुरभारत्यां सुतरां प्रयुक्तौ विद्येते।

पाणिनिनये क्षुर् विलेखने धातौ लेखनं छेदनमित्याचार्याः। लिख्धातुश्चाक्षरविन्यासार्थक उपदिश्यत इति छेदनेनाक्षरविन्यासो लेखनमिति निर्गलितोऽर्थः। एवमेव लिप् उपदेहे धातुस्तत्र चोपदेहो वृद्धिरित्यर्थः। एवमाधारे न्यूनतामकृत्वा रंगमस्यादिसाधनेन वृद्धिं सम्पाद्याक्षरसन्निवेशो लिपिरित्यपि स्फुटम्। अतो भारतानां श्रुतिप्रामाण्यवादिनामक्षरविन्यासपद्धतिरनवगतासीदिति कल्पनं सर्वथा भ्रान्तिविजृम्भितमेव भवति।

प्रमाणान्तराण्यप्यत्रोपस्थितानि दृश्यन्ते, यथा निरुक्ते-*बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषु*रित्यत्र वाङ्मयसन्दोहस्य विभजने, बिल्मं भिल्ममिति यास्काचार्यो (1.6.5) निर्वक्ति। भिल्मं भेदनं च लिपिद्वारेणैव सम्भवतीति स्फुटम्। महाभारतेऽपि—

इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती।

विहिता ब्रह्मणा पूर्वं लोभात्त्वज्ञानतां गता।। (म.भा.शा. 188/15)

इत्थं ब्राह्मीलिपिरभिधीयते। ततश्च ऋज्राश्वस्य दौहित्रो जरदस्त्रः ब्राह्मीलिपिद्वेष्यासीत्, तेन च खरोष्ठी प्रवर्तितेत्यपि केषाञ्चन मतं प्राप्यते। वाल्मीकिरामायणे तु—*रामनामांकितं चेदं पश्य देव्यंगुलीयकम्* (सु.का. 36/2) इत्येतेन नामवर्णांकनप्रकारोऽलंकारेष्वपि निर्दिश्यते। वर्णानां संख्यानं सुनियतं शिक्षाप्रातिशाख्यव्याकरणादिशास्त्रेषु यथामतं परिभाष्यते, यथा पाणिनिशिक्षायां-त्रिषष्टिश्चतुष्षष्टिश्च वर्णाः शम्भुमते मता इत्यादिना। तत्रैव शुद्धवर्णलेखापरिहार्यत्वमपि निर्दिष्टं पाठकाधमगणनायां यथा—

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।

अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।। इति।

पुस्तकलिखितस्य शोधनं, तच्चार्थानुसन्धानपूर्वकं कर्तव्यमित्यत्र विधीयते शिक्षास्मृतौ पाठकगुणत्वप्रतिष्ठापनार्थम्। किञ्च पाठकपदमेव तत्सम्मुखस्थं वाङ्मयपुस्तकं प्रकाशयति, अन्यथा श्रोत्रधीयानादिपदप्रयोगः स्यात्।

सुश्रुतसंहितायामपि समुक्ताः पाठगुणा यथा-(3/54-56)

'अथ वत्स! तदेतदध्येयं यथा तथोपधारय मया प्रोच्यमानम्-अथ शुचये कृतोत्तरासंगायाव्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् पदं पादं श्लोकं वा। ते च पदपादश्लोका भूयः क्रमेणानुसन्धेयाः। एवमेकैकशो घटयेदात्मना चानुपठेत्। अद्रुतमविलम्बितमविशंकितमननुनासिकं व्यक्ताक्षरमपीडितवर्णमक्षिभ्रुवौष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरैः पठेत्। न चान्तरेण कश्चिद्व्रजेत् तयोरधीयानयोः। भवतश्चात्र—

शुचिर्गुरुपरो दक्षस्तन्द्रानिद्राविवर्जितः।

पठन्नेतेन विधिना शिष्यः शास्त्रान्तमाप्नुयात्।।

वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्मनैपुणे।

तदभ्यासे च सिद्धौ च यतेताध्ययनान्तगः।। इति।

अत्रापि पद-पाद-श्लोकानामनुपठनमर्थविज्ञानञ्चाध्ययने पुस्तकप्रयोगं सूचयति।

एवञ्चार्षशास्त्रेषु प्रतिष्ठिते स्तम्भलेखपुस्तकलिप्यादिसिद्धान्ते साम्प्रतं किं भवेदाद्यं पुस्तकं ग्रन्थालयेष्विति निरूपयामः। तदर्थं प्राच्यप्रमाणानां न भवत्यपेक्षा, पाश्चात्त्यैरेव वक्ष्यमाणांगीकारेण। यथोच्यते मोक्षमूलरवर्येण—

The *Ṛgveda* is the oldest book in the library of the world इति। रेवरेण्डमौरिसमनीषी च The teachings of the Vedas प्रबन्धे प्रतिपादयति—' We may safely now call *Ṛgveda* as the oldest book, not only of the Aryan race but of the whole world' इति। प्रो. हीरेनमहोदयेनापि Historical Researches इत्यत्रांगीकृतं यत्—' The Vedas are without doubt the oldest books composed in Sanskrit' इत्यादि। इत्थं विश्वग्रन्थालयेषु प्रथमपुस्तकत्वेनाभ्यर्हितो वेदः पुस्तकालयगौरवे भारतीयामाद्यविधिं विदधाति।

आगमशास्त्रेषु पुस्तकलेखादक्षरब्रह्मसन्निधानमुपदिश्यते यथा (प्रा.तो.स. 7 परि.)—

सर्व चराचरं विश्वं वर्णात्तु जायते ध्रुवम्।
नानाशास्त्रं पुराणञ्च इतिहासञ्च सुन्दरि!।
वेदञ्च स्मृतिशास्त्रञ्चान्यानि यानि कानि च।।
अक्षराज्जायते सर्वं परं ब्रह्म स्वयं प्रिये।।

योगिनीतन्त्रे तृतीयभागे सप्तमपटले भूमौ पुस्तकलेखनं तेषां भूमौ स्थापनं च निषिध्यते। यथा—

न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तके लिखेत्।
न भूमौ पुस्तकं स्थाप्यं न मुक्तमाहरेत्तु तत्।।
भूकम्पे ग्रहणे चैव अक्षरं वाथ पुस्तकम्।
भूमौ तिष्ठति देवेशि! जन्मजन्मसु मूर्खता।।
तदा भवति देवेशि! तस्मात्तत्परिवर्जयेत्।।

लेखिनीस्वरूपमपि तत्रोच्यते यथा—

वंशसूच्या लिखेद्वर्ण तस्य हानिर्भवेद् ध्रुवम्।
ताम्रसूच्या तु विभवो भवेन्न तत्क्षयो भवेत्।।
महालक्ष्मीर्भवेन्नित्यं सुवर्णस्य शलाकया।
बृहन्नलस्य सूच्या वै मतिवृद्धिः प्रजायते।।
तथा अग्निमयैर्देवि! पुत्रपौत्रधनागमः।
रौप्येन विपुला लक्ष्मीः कांस्येन मरणं भवेत्।।
अष्टांगुलप्रमाणेन दशांगुलेन वाथवा।
चतुरंगुलसूच्या वा यो लिखेत् पुस्तकं शुभे!।।
तत्तदक्षरसंख्ये तु स्वल्पायुर्याति वै दिने।।

अत्राग्निमयैश्चित्रकाष्ठमयै रौप्येन पित्तलेन चेत्यर्थः। यथा रौप्येनेत्यादिवचने एकत्रैव विधिनिषेधौ, तथात्राप्यष्टांगुलदशांगुलयोर्विधिनिषेधश्चतुरंगुले।

पुस्तकमानमपि तत्रैवोक्तं यथा—

मानं वक्ष्ये पुस्तकस्य शृणु देवि! समासतः।
मानेनापि फलं विन्द्यादमाने श्रीर्हता भवेत्।।
हस्तमात्रं मुष्टिमात्रमाबाहु द्वादशाङ्गुलम्।
दशाङ्गुलं तथाष्टौ च अतो हीनं न कारयेत्।।

पुस्तकेषु वेधफलमभिधीयते यथा—

वेधद्वयं मुष्टिहस्तं बाहुमात्रे चिरन्तनम्।
समभागे महेशानि! हस्तादौ रूपबन्धकम्।।
अष्टाङ्गुलं परित्यज्य मध्ये वेधं न कारयेत्।।
प्रादेशादौ भवेद्रन्ध्रो द्व्यङ्गुले वा समाचरेत्।।
पुस्तकस्य च आद्यन्ते यन्त्रवेधं विकल्पयेत्।
भार्याहानिर्भवेदाशु धनानां वा क्षयो भवेत्।।
दग्धरन्ध्रे भवेत् पीडा वर्त्तुलं शुभदं भवेत्।
चतुष्कोणे विप्लवस्तु त्रिकोणे मरणं भवेत्।।

पुस्तकेषु पत्रकरणं विधीयते यथा—

भूर्जे वा तेजपत्रे वा तथा च तालपत्रके।
अगुरुणापि देवेशि! पुस्तकं कारयेत् प्रिये!।।
सम्भवे स्वर्णपात्रे च ताम्रपात्रे च शंकरि!।
अन्यवृक्षत्वचि देवि! तथा केतकिपत्रके।।
मार्त्तण्डपत्रे रौप्ये वा वटपत्रे वरानने!।
अन्यपत्रे च सुदले लिखित्वा यः समभ्यसेत्।।
स दुर्गतिमवाप्नोति धनहानिर्भवेद् ध्रुवम्।।

श्रुतिग्रन्थानां यथालिखितपाठस्य निषेधस्तत्रैव—

वेदस्य लिखनं कृत्वा यः पठेद् ब्रह्महा भवेत्।

पुस्तकं वा गृहे स्थाप्यं वज्रपातो भवेद् ध्रुवम्।। इति।
पुस्तकाक्षरेषु देवस्थितिः प्रतिपादिता यथा—
सत्येऽक्षरे स्थितः शम्भुः शूलपाणिस्त्रिलोचनः।

प्रजापतिर्द्वापरे च त्रेतायां सूर्य एव च।।
कृते युगे पिनाकी च कलौ लिप्यक्षरे हरिः।
आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत्।।
हरिश्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः।
यावदक्षरसंख्यानं प्रतिपत्रे च सुन्दरि!।।
तावद् युगसहस्राणि ब्रह्मलोके वसेच्चिरम्।।
वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं स तु।
यावदक्षरसंख्यानं तावच्च नरके वसेत्।।

पुस्तकालयादिस्थापने ग्रन्थप्रदानेनान्तफलं पुराणेषूपदिश्यते यथा—

विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात्।।
शास्त्रदृष्ट्या जगत् सर्वं सुश्रुतञ्च शुभाशुभम्।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्तिके।।
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत्।
आत्मविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते।।
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च।
शास्त्रं कामदुघा धेनु; पृथिवी चैव शाश्वती।।

इति पाद्मोत्तरखण्डे (110 अध्याये)। वेदशास्त्रादिदानफलं गारुडेऽप्यभिहितं यथा—

वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि।
मूल्येन लेखयित्वा यो दद्याद् याति स वैदिकम्।।
इतिहासपुराणानि लिखित्वा यः प्रयच्छति।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम्।। इति। (2/5 अध्याये)

भागवतदानविधानमपि भूयस्तरां फलदमुपदिष्टम्। धर्मशास्त्रेषु पुस्तकैकप्रदानं सहस्रगोदानफलप्रदमित्युक्तं यथा—

कपिलदानसहस्रेण सम्यग्दत्तेन यत्फलम्।
तत्फलं समवाप्नोति पुस्तकैकप्रदानतः।। इति शम्।

## लेख-सारांश

**(क) वैदिक वाङ्मय में लेखविधि के संकेत एवं प्रमाण–**

1. ऋषि द्वारा वेदमन्त्र का दर्शन लिखित का संकेतक।
2. उत त्वः पश्यन् न ददर्श वाचम् (ऋग्वेद 10/71/4) में लिखित वाणी का दर्शन।

3. प्रास्मै गायत्रमर्चत (ऋग्वेद 8/1/8) में इन्द्र के लिए गायत्र साम का प्रदान।
4. माध्यन्दिनीय संहिता (15/4) में क्षुरोभ्रजश्छन्दः तथा अक्षरपङ्क्तिश्छन्दः, पदपङ्क्तिश्छन्दः, विष्टारपङ्क्तिश्छन्दः, द्वारा अक्षर, पद, संहिता के माध्यम से छन्दोलेख।
5. माध्यन्दिनीय संहिता (15/4 तथा 5) में क्षुर तथा भ्रज - दो लेखविधायें।
6. 'अर्धेन्दुलसितम्' (गणपत्यथर्वशीर्ष) आदि में अर्धचन्द्राङ्कन निर्देश।
7. वैदिक 'रुक्म' मुद्रा में अङ्कचिह्न।
8. सोमयाग के ग्रहपात्रों तथा चमसपात्रों में विभिन्न चिह्नांकन।

**(ख) पौराणिक तथा अन्य ग्रन्थों में लेखविधि के निर्देश–**

1. क्षुर् एवं लिख् धातु खोदकर अङ्कन तथा लिप् धातु लेपन द्वारा अङ्कन के अर्थ में पाणिनि द्वारा उपदिष्ट।
2. निरुक्त (1/6/5) में बिल्मग्रहण (विभक्त वाङ्मय की प्राप्ति) का कथन।
3. वाल्मीकि रामायण (सुन्दरकाण्ड 36/2) में रामनामांकित अंगूठी का उल्लेख।
4. पाणिनीय शिक्षा (श्लो0 32) में यथालिखित पढ़ने की अवरता।
5. सुश्रुत संहिता (3/54-56) द्वारा पद, पाद आदि क्रमशः पढ़ने के पाठगुण।
6. प्राणतोषिणी (सर्गखण्ड 7 परिच्छेद) में योगिनीतन्त्र आदि के उद्धरण द्वारा पुस्तकलेखन, लेखिनी का स्वरूप, पृष्ठों का माप, पृष्ठों में वेध, लेखाधार वस्तुएँ, पुस्तकाक्षरों में देवतत्त्व आदि का विधान।
7. भविष्यपुराण (उत्तरपर्व 174 अ0) तथा दानमयूख में पद्मपुराण, गरुडपुराण आदि के वचनों द्वारा पुस्तकदान का विशेष फल
8. 'लेप्या लेख्या च सैकती' विधानानुसार लेपन एवं लेखन द्वारा प्रतिमा का निर्माण।
9. यन्त्र निर्माण में दाडिम आदि की काष्ठलेखिनी का निर्देश।
10. पुराणों में अनेकत्र बाणासुर की पुत्री उषा और अनिरुद्ध के विवाह प्रसंग में चित्रलेखा द्वारा रूपाङ्कन।

**(ग) संस्कृत साहित्य में लेखविधि के प्रमाण–**

1. चौसठ कलाओं के अन्तर्गत लेखनकला।
2. प्रतिमानाटक में बाली को लगे बाण पर नामांकन।
3. कालिदास द्वारा अभिज्ञानशाकुन्तल में चिह्नित अंगूठी, कुमारसंभव में 'अनङ्गलेखक्रिययोपयोगम्' का उल्लेख, मालविकाग्निमित्रम् में पत्रलेख, मेघदूत में 'त्वामालिख्य' आदि का वर्णन।
4. उत्तररामचरित में अश्वमेध के घोड़े पर अङ्कन का वर्णन।
5. मुद्राराक्षस में श्रोत्रियाक्षरों की अपाठ्यता का वर्णन।

आदि के द्वारा संहिताओं से प्रारम्भ कर समस्त संस्कृत साहित्य में लेखविधि के प्रमाण उपलब्ध होते हैं।

**संक्षेप विवरण–**

ऋ0 - ऋग्वेद संहिता
मा0सं0 - माध्यन्दिनीय संहिता
म0भा0शा0 - महाभारत शान्तिपर्व
सु0का0 - सुन्दरकाण्ड (वाल्मीकीय)
प्रा0तो0स0 - प्राणतोषिणी सर्गखण्ड